# पाणिनीय एवं सारस्वतव्याकरणानुसारं

भट्ट अश्विन[1], भवानीशङ्करभाई[2]

*[1,2] शोधछात्रः – गुजरात युनिवर्सिटी, अहमदाबाद, गुजरात*

doi.org/10.64643/IJIRTV12I8-191429-459

**शोधसारांशः-'एकं सद्विप्रा बहुधा वदन्ति' इति श्रुति वाक्यानुसारं एकमेव शब्दस्य रूपसिद्धौ विविधेषु व्याकरणेषु विविधाः प्रक्रियाः सन्ति तदाधारेण पत्रेऽस्मिन् रघुवंशस्यमङ्गलाचरणमाश्रित्य मङ्गलपद्ये विद्यमान प्रातिपदिकशब्दानां पाणिनीयव्याकरण एवं सारस्वतव्याकरण अनुसारं प्रक्रियायाः भिन्नता निर्दिष्टा । यथा –वागर्थः इत्यस्य वाक् प्रातिपदिकस्य 'वच्' इति धातोः पाणिनीयव्याकरणानुसारं सुबन्तादि विभक्त्यनन्तरं कुत्वं भवति । सारस्वते 'वच्' इति धातोः कुत्वं भूत्वा सि इत्यादि विभक्तिनां प्रवृत्तिः । एवं रित्या उभयोः व्याकरणप्रक्रिययोः का भिन्नता किं च वैशिष्ट्यमिति निर्दिष्टमिति ।**

वागर्थाविव' इति पद्ये शब्दप्रक्रिया

इदमन्धतमः कृत्सनं जायते भुवनत्रयम् ।
यदि शब्दात्मकं ज्योतिरासंसारं न दीप्यते '।

पद्येऽस्मिन् आचार्य दण्डीना शब्दस्य माहात्म्यं प्रदर्शितं यत् यदि अस्मिन् संसारे शब्दात्मकं ज्योति अनुपलब्धा, तर्हि त्रीणि भुवनानि अन्धकारमय एव आसीत् । शब्द एव अस्माकं मनोभावप्रस्तुतिकरणस्य मुख्यसाधनं वर्तते, तनैव संप्रेषणप्रक्रिया संभविता । अत एव महाभाष्ये व्याकरणप्रयोजने उक्तं यत्

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले । सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ।।[1]

अर्थात् शब्दानां सम्यक् प्रयोगेनैव मानवस्य व्यक्तितत्वमुद्दीप्यते । तच्छब्दानां प्रयोगः कया रित्या करणीयमिति अस्मान् व्याकरणशास्त्रं पाठयति । व्याकरणशास्त्रे सर्वेषां शब्दानां रहस्यं बीजं वा वर्तते । शब्दानां विविधानि स्वरूपाणि सन्ति यथा – नामाख्यातोपसर्गनिपाताः तेषु आदिमं 'नाम' इति वर्तते । तद्विषये 'शाकटायनाचार्यानुसारं सर्वे नामानि आख्यातजातानि एव ।' अर्थात् धातूभिरेव प्रातिपदिकानां उत्पतिः संभवः ।[2] तन्नामशब्दशास्त्रे प्रातिपदिकं, संज्ञा, लि, लिङ्गं इत्यादिभिः शब्दैः व्याहृतः । विविधेषु व्याकरणेषु विविधाः संज्ञाः वर्तन्ते । यथा –

- ❖ गोपथ ब्राह्मणे--किं प्रातिपदिकं किं नामाख्यातम् ।[3]
- ❖ निरुक्ते--सत्त्वप्रधानानि नामानि ।[4]
- ❖ ऋग्वेदप्रातिशाख्ये - तन्नामयेनाभिदधाति सत्त्वम् ।[5] सत्त्वाभिधायकं नाम ।[6]
- ❖ बृहद्देवतायां शब्दोच्चारितेनेह येन द्रव्यं प्रतीयते ।

तदक्षरविधौ युक्तं नामेत्याहुर्मनीषीणः ।[7]

---

[1] व्या. महाभाष्यम् – पश्पशाह्निकम्
[2] ऋक् प्रातिशाख्यम् – १७-७४७
[3] गो.ब्रा. – १-१-२४
[4] नि. -१—१-१
[5] ऋ. प्राति. १२.१८
[6] ऋ.प्रा. १२-२५
[7] बृ.दे. १-४२,४३

 ISSN: 2349-6002

- ❖ वाजसनेयी प्रातिशाख्ये- तच्चतुर्धा नामाख्यातोपसर्गनिपाताः ।[8]
- ❖ भाषिक सूत्रम् यथार्थं चतुर्विधं पदं विपर्यस्तम् ।

नामाख्यातोपसर्गनिपातरूपं चतुर्विधं पदम् ।।[9]

- ❖ शौनकीया चतुराध्यायिका – चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानाम् ।[10]
- ❖ काशकृत्स्नव्याकरणम् - नाम्न उपमानादाचारेआयङीयौ ।[11]
- ❖ काशकृत्स्ने लिङ्गोऽपि - लिङ्गे किमि ति विभक्तौ एतन्नाम् ।[12]
- ❖ फिटसूत्रे (फिट्) -किटोऽन्त उदात्तः ।[13]
- ❖ नाट्यशास्त्रम्

स्वाद्यत्याधिकारगुणैर्थविशेषैर्विभूषितन्यासा ।
प्रातिपदिकार्थलिङ्गयुक्तं पञ्चविधमिदं ज्ञेयम् ।।
नामाख्यातनिपातैरुपसर्गसमासतद्धितैर्युक्तम् ।[14]

- ❖ अष्टाध्यायाम् अर्थवदधातुरप्रत्ययः प्रातिपदकम् ।कृत्तद्धितसमासाश्च ।[15]
- ❖ कातन्त्रव्याकरणम् - धातुविभक्तिवर्जमर्थवल्लिङ्गम् ।[16]
- ❖ सारस्वतव्याकरणम् - अविभक्तिर्नाम ।[17]

एवं रीत्या नाम्नः, प्रातिपदिकस्य विविधाः संज्ञाः अधिकतरशास्त्रेषु समुपलभ्यते[18]। एवं प्रातिपदिकशब्दानां विविधाः प्रक्रियाः सम्भवन्ति । तद् वागर्थेति पद्येस्मिन् विद्यमानानां पदानां प्रक्रियया स्पष्टं भविष्यति ।

वागर्थाविव संपृक्तौ वागर्थः प्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।[19]

पद्येऽस्मिन् वागर्थोपमया एव नमस्कारात्मकमिदं मङ्गलम् । पद्येस्मिन् प्रथमाद्विवचनान्तं रूपे 'वागर्थौ[20], संपृक्तौ'[21] इति वर्तेते । 'पितरौ', 'पार्वतीपरमेश्वरौ' इति द्वितीयाद्विवचनान्तं, 'प्रतिपत्तये' इति चतुर्थ्येकवचनान्तं, 'वागर्थः', 'जगतः' इति षष्ठयेकवचनान्तं, एवं च वन्दे इति क्रियापदं उत्तमपुरुषैकवचनान्तं वर्तते, एवं विभक्तिनां प्रयोगः द्रश्यते । पद्यात् वाक्, जगतः, प्रतिपत्तये इति शब्दानां सारस्वतपाणिनीय शब्दप्रक्रियायां सुबन्ते किं वैभिन्यमिति पश्यामः ।

## ।। वाक् ।।

### पाणिनीयप्रक्रिया

वक्ति तच्छिला इत्यर्थे वच् परिभाषणे इत्यनेन क्विबवचिप्रच्छायतस्तुकुट प्रूजुश्रीणां दीर्घौ सम्प्रसारणं च इत्यनेन क्विप् प्रत्यये, सम्प्रसारणञ्च वचिस्वपियजादिनां कीति[22] इत्यनेन सम्प्रसारणस्यबाधः, धातुदीर्घादिप्रक्रिया भूत्वा 'वाच्' इति शब्दो विधियते । अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यनेन प्रातिपदिक संज्ञा सुप्रत्यय, हलङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल् इत्यनेन सुलोपे, चोः कुः इत्यनेन चकारस्य कुत्वे वाक् इति ।झलां जशोन्ते इत्यनेन जशत्वे, वावसाने इत्यनेन चर्त्वे च वाक्, वागिति पाणिनीयप्रक्रियया रूपे सिद्ध्यतः ।

सारस्वतप्रक्रिया - वच् धातोः क्विप् सर्वधातुभ्यः[23] इत्यनेन क्विप्, अत्रापि सर्वापहारलोपः दीर्घश्च, 'वाच्' इति

---

[8] वा.प्रा.८-५२,५३
[9] भा.सू.अ.भा. – ३-१०
[10] शो.च. आ. १-१
[11] का.व्या. – सू - १२८
[12] का.व्या. –सू -२
[13] फि.सू- १-१
[14] ना.शा. – १५- ४,२५
[15] अष्टा. -१.२.४५,४६
[16] का.व्या.च.वृ.स.-१
[17] स.व्या. – पू – ७-२
[18] पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन – पृ.सं. -३३४-३३५
[19] रघुवंशम् – १.१
[20] चार्थे द्वन्द्वः – २-२-२९ इत्यनेन द्वन्द्वः
[21] परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः – २.४.२६
[22] अष्टा. – ६.१.१५ वै.सि.कौ.- २४०९
[23] सा.व्या. – १३.१६

स्थिते चोः कुः [24] इत्यनेन कुत्वे, हसेपः सेः [25] इत्यनेन सेः लोपः । अत्रापि वावसाने [26] इत्यनेन कस्य गः भूत्वा वाक्, वाग् इति द्वे रूपे निष्पद्येते ।

सारांशःसारस्वतीयप्रक्रिया लघ्वी दृश्यते । यथा कस्य गः जशत्वस्याभावः । एवं कुत्वं सुबादि प्रक्रिया प्राक् भवति । पाणिनीये कुत्वं सुबन्तादि प्रक्रियानन्तरं विधियते ।

| | वाक्, वाग् | | |
|---|---|---|---|
| | पाणिनीय प्रक्रिया | सारस्वत प्रक्रिया | |
| 1 | क्विबवचिप्रच्छायतस्तुकुट प्रूजुश्रीणां दीर्घौ सम्प्रसारणं च । वचिस्वपियजादिनां कीति । | क्विप् सर्वधातुभ्यः | क्विप् |
| 2 | हलङ्याब्भ्योदीर्घात्सुतिस्य पृक्तं हल् | हसेपः सेः | सु इति विभक्ति लोपः |
| 3 | चोः कुः | चोः कुः | कुत्वम् |
| 4 | वावसाने झलां जशोन्ते | वावसाने | जशत्वम् |

।। जगतः ।।

जगतः इति तकारान्तनपुंसकलिङ्गस्य षष्ठ्यैकवचनस्य रूपं वर्तते सिद्धान्तकौमुद्यां जगत् शब्दस्य प्रक्रिया न प्रदर्शिता किन्तु तकारान्त यकृत्वत् प्रचलति यतो हि सारस्वते जगदिति शब्दस्य प्रक्रिया निर्दिश्य यकृत् शब्दस्यापि तद्वदैव निर्दिष्टः । षष्ठ्यैकवचने प्रक्रिया वैशिष्ट्यं नोपलभ्यते । जगत् + अस् इत्यावस्थायां सस्य रुत्वं [27] विसर्गश्च भवति । सारस्वतेपि तद्वदेव।

।।प्रतिपत्तये ।।

'प्रतिपत्तये' इति ह्रस्वइकारान्तस्त्रीलिङ्गस्य चतुर्थ्यैकवचनस्य रूपं मतिवत् अस्ति। पाणिनीये 'शेषोघ्यसखि' इत्यनेन घिसंज्ञायाः विधानं विशेषतया कृतः सारस्वते तन्नास्ति 'घि' संज्ञायाः प्रयोगेण प्रक्रिया पाणिनीयव्याकरणे एव दृश्यते सारस्वते तन्नास्ति, सारस्वते प्रकारान्तरेण कार्यसिद्धिः कृताः । अर्थात् सारस्वते तस्य आवश्कता नास्ति इति तस्मिन्नुपरि लिखितं यत् " दोनो ही व्याकरणों मे उदाहरणों की सिद्धि समानरूप से हो रही है । अत एव सारस्वतव्याकरण मे घि संज्ञा का विधान न किया जाना इसकी न्यूनता नहीं कही जा सकती है"[28]। तथापि केवल पाणिनीये एव एषा संज्ञायाः प्रयोगः वर्तते इति न, अन्यत्रापि वर्तते । यथा घ्यसख्यद्वन्द्वपतीदुत्[29], घिः असखिअद्वन्द्वपति इदुत्[30], उदितौ घिः सख्यसमासपतिवर्जम् [31] । तथा च अन्यस्मिन् व्याकरणे घिसंज्ञायाः स्थाने अन्यसंज्ञानां प्रयोगः वर्तते । यथा – कातन्त्रव्याकरणे तथा सुपद्मव्याकरणे अग्नि [32] एवं च जैनेन्द्रव्याकरणे सु[33] ।

---

24 सा.व्या. - ७.-४१

25 सा.व्या. – ६-३०

26 सा.व्या- ७.६५

27 १६२ ससजुषोरुः८-२-६६ । खरवसानयोर्विसर्गः ८-३-१५

28 पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन पृ- ३८५

29 शाकटायनव्याकरणम् -१-१-४०

30 शब्दानुशासनम् १-२-१५

31 सुपद्मव्याकरणम् - २-३-७

32 इदुदग्निः– का.व्या.च.वृ- सूत्र- ८, उदितौ घिः सख्यसमासपतिवर्जम् - सु.प.व्या.२-३-७

33 स्वसखि । पतिः से । प्रो घि च । जै. व्या. १-२-९७,९८,९९

 ISSN: 2349-6002

तथापि यथा सारस्वते औ यु [34] इति सूत्रेण सन्धिं कृत्वा इकारान्तस्य उकारान्तस्य ग्रहणं भवति तद्वत् पाणिनीये कथं न ? यतो हि तस्यादित उदात्तमर्धह्रस्वम्[35]। इति सूत्रानुसारं इकारोकारश्च इत्युच्यमाने सति अष्टादश इकारोकाराणां ग्रहणं भवति । तेन नदीसंज्ञया विधियमानं कार्यमत्र भवति । यतो हि यूस्त्र्याख्यौ नदी (ईदूदन्तौ नित्यस्त्रीलिङौ नदीसञ्ज्ञौ स्तः । प्रथमलिङ्गग्रहणं च (वा.-१०३६)पूर्वं स्त्राख्यस्योपसर्जनत्वेऽपि इदानीं नदीत्वं वक्तव्यमित्यर्थः)[36] । इति सूत्रस्य निदर्शनं कौमुद्यां अजन्तपुँल्लिङ्गप्रकरणे समुपलभ्यते । समासात्पूर्वस्त्रीलिङ्गवाची शब्दस्योपसर्जनत्वात्(अप्रधानत्वात्) पुँल्लिङ्गत्वादपि नदीसंज्ञा स्त्रीलिङ्गे भवति। बहुश्रेयसि ।

ननु तर्हि सारस्वते एतादृशी अनिष्टापत्तिः कथं न ? तत्र तु य्वोर्धातोरियुवौ स्वरे ।[37] इति निदर्शनेन दीर्घ-ईकारान्त-ऊकारन्तस्य च ग्रहणं भवति । तथा च पाणिनीये अपि अचिश्नुधातुभ्रुवां य्वोरियङुवङौ [38] । इत्यत्रापि निर्देशः । पाणिनीयसूत्रवृतौ पुनः पुनः इकारान्तोकारान्तयोः उच्चारणं न भवेदित्यर्थं तथा च सूत्रेष्वपि लाघवत्वं भवितुं शक्यते । तथा च अन्य सप्तसु सूत्रेषु प्रवृत्तित्वात् ।[39] पाणिनीये एतादृशी संज्ञाव्यवस्था अभ्यासार्थिनां सुखबोधाय व्याकरणाध्ययने रुचिवर्धनाय च वर्तते ।

प्रतिपत्तिः इति शब्दस्य द्वे रूपे भवतः प्रतिपत्तये एवं प्रतिपत्यै अत्र पाणिनीये आडागमः तथा सारस्वते अडागमो भवति । किन्तु सारस्वते केवल वर्तमानाभ्यामिकारोकाराभ्यामिति निमित्ताय गृहितः । किन्तु पाणिनीये सूत्रार्थः जटिलो दृश्यते । सूत्रवृत्तौ स्त्रीलिङ्गशब्दः द्विधा विभज्यते नित्यवर्तमानाभ्यामिति । तत्रापि ह्रस्वदीर्घकारोकाराभ्याञ्च । एतादृश अन्ते भव्यमान दीर्घईकार-ऊकार नित्यस्त्रीलिङ्गशब्दः । इयङुवङादेशौ यत्र भवितुं शक्यः तादृश स्रीशब्दः भिन्नः, ङिति परे नदीसंज्ञौ स्तः । एवं च नित्यस्त्रिलिङ्गौ ह्रस्वइकारोकारौ ङिति परे विकल्पेन नदीसंज्ञा प्राप्यते । सूत्रेऽस्मिन् एतादृशी जटिलतायाः कारणं वर्तते यत् अजन्तपुल्लिङ्गे यूस्त्र्याख्यौ नदी [40] इत्यनेनात्र सरलतया नदीसंज्ञा प्राप्ता किन्तु नेयङुवङ्स्थानावस्त्री[41] इत्यनेन इयङुवङादेशौ यत्र भवति तत्स्थानिनः इकारोकारयोः नदीसंज्ञा न भवति । किन्तु तत्सूत्रस्यापवादात्मकं सूत्रोऽयं(ङिति ह्रस्वश्च)। स्त्रीलिङ्गे पुनः नदीसञ्ज्ञा विभाषया प्रवर्तनाय निर्मितः । सारस्वते केवलं वर्तमानस्त्रीलिङ्गस्यैव समुल्लेखो वर्तते नित्यस्त्रीलिङ्गस्य न । किन्तु सारस्वतव्याकरणस्य सुबोधिकाटीकायां कथितं यत् "नित्यं स्त्रीयां वर्तमानाभ्यामिकारोकाराभ्याम् 'इति व्याख्येयम् तेन शुचि शब्दोऽनियतलिङ्गो हरिवज् ज्ञेयः"[42] । किं भेदः वर्तमानस्त्रीलिङ्गनित्यस्त्रीलिङगाभ्याम्? अस्य स्पष्टीकरणं श्रीधरमुखोल्लासीन्यां हिन्द्यां वर्तते यत् ' स्त्रीलिङ्ग में वर्तमान इकारान्त- उकारान्त शब्द चाहे वे नित्य स्त्रीलिङ्ग हो अथवा न हो, परन्तु नदीसंज्ञा की क्रियमाणता में वे स्त्रीलिङ्गी हो तो उनकी विकल्प से नदीसंज्ञा होती है, ङित् वचनोमें । नदी पक्ष में नदी आश्रीत कार्य होते हैं तथा तदभावपक्ष में घि सञ्ज्ञा होकर तदाश्रित कार्य होते है । साथ हि नित्यस्रीलिङ्ग ईकारान्त- उकारान्त

[34] सा. व्या. ६-३१

[35] वै.सि.कौ- ८, अष्टा.- १-२-३२

[36] वै.सि.कौ. – २६६, अष्टा – १-४-३

[37] सा.व्या- ६-४७

[38] अष्टा. ६-४-७७, वै.सि.कौ -२७१

[39] १. वै.सिकौ. – २४७ । अच्च घेः। अष्टा.-७-३-१२०,
२. वै.सि.कौ. -२४४ । आङोनास्त्रियाम्। अष्टा -७-३-११९,
३. वै.सि.कौ.- २४५। घेर्ङिति। अष्टा.७-३-१११,
४. वै.सि.कौ.- ९०३। द्वन्द्वे घि। अष्टा. -२-२-३२
५. वै.सि.कौ.- २९७ । इदुद्भ्याम् । अष्टा. – ७-३-११७
६. वै.सि.कौ. – २५६ । औत् । अष्टा – ७-३-११८
७. वै.सि.कौ.- २५१ । ख्यात्यात्परस्य । अष्टा. – ६-१-१०८

[40] वै.सि.कौ. २६६ अष्टा -१-४-३

[41] वै.सि.कौ. – ३०३ अष्टा – १-४-४

[42] सा.व्याकरण- सू - ४२

शब्दो में जहाँ इयङ्-उवङ् आदेश है, कि विकल्प से नदी संज्ञा होती है ङित् विभक्तियों के परे रहते'[43] ।

नन्वेदानीं अडागमाडागमयोः तुलना पश्यामः । सारस्वते अडागमो भवति एवं पाणिनीये आण्नद्याः इत्यनेन आडागमो भवति तत्कथं ? यतो हि पाणिनीये अजन्तपुल्लिङ्गे 'बहुश्रेयसी' इत्यत्र आडागमस्य आवश्यकता, अतः तत्रैव सूत्रोऽयं निर्दिष्टः किन्तु सारस्वते तत्र आवश्याकताभावे न निर्दिष्टम् । तर्हि आट् कथं ? अडैव विधियताम्, तेनापि वृद्धि भूत्वा मत्यै इति भवितुं शक्यते । तन्न शक्यम् यतो हि पाणिनीये आटश्च[44](आटोऽचि परे वृद्धिरेकादेशः स्यात् )तथा वृद्धिरेचि(आदेचि परे वृद्धिरेकादेशः स्यात् ) इत्याभ्यां वृत्तिनिर्देशत्वात् । सारस्वते 'ए ऐ ऐ'[45](अवर्णक्रमादेकारे ऐकारे च परे सह ऐकारताम् यातः ) इति निर्देशभिन्नत्वात् । आगमे भिन्नता दृश्यते ।

एवं सारस्वतपाणिनीयव्याकरणे प्रातिपदिकानां प्रक्रियासु भिन्नता दरिदृश्यते । तदुपरि विविधव्याख्यातृणां विभिन्नानि मतानि सन्ति । उभयोः व्याकरणपन्थयोः वैविध्यतायाः आस्वादनं भवति, एवं च वयमपि शब्दानां निर्माणप्रक्रियायाः बोधः भवेदित्यर्थः किञ्चिदल्पप्रयासो कृतः । इति दिक् ।

## ।।सन्दर्भावली।।

[1] डो. भगवतीप्रसादशर्मा- पाणिनीय एवं सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन – भारतीय विद्याप्रकाशन – वाराणसी १९९९

[2] रघुवंशम् – संजीवनी टीका सहितम् - चौखम्बा प्रकाशन - २००९।

[3] गोविन्दाचार्य - वैयाकरण सिद्धान्त कौमुदी – श्रीधरमुखोल्लासिनी व्याख्या – चोखम्बा प्रकाशन २०१७

[4] हरिप्रसाद शर्मा - सारस्वतव्याकरणम् - सुबोधिनी भाषाटीका - वेङ्कटेश्वर मुद्रणालयम् – सं १९६१

[5] परिभाषेन्दु शेखर - वाक्यार्थचन्द्रिका व्याख्या – संस्कृत परिषद् - १९८७

[43] वै.सि.कौ. श्रीधरमुखोल्लासीनी – पृ- ६७७

[44] वै.सि.कौ.- २६९ अष्टा. – ६-१-९०

[45] सा. व्या. - ४४